तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

July 2026

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:13 Issue: 04
July 2026, Price Rs.20/-
No. of pages-24





अप्पलायगुण्ट
श्री प्रसन्नवेङ्कटेश्वरस्वामिनः पुष्पयागमहोत्सवः
30.07.2026



# गीतामृतम्

श्रीभगवानुवाच -

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जन।
कर्मेन्द्रियैः कर्मयोगमसक्तस्सः विशिष्यते।।

नियतं कुरु कर्मत्वं कर्मज्यायोह्यकर्मणः।
शरीरयात्रापि ते न प्रसिद्ध्येदकर्मणः।।

(भगवद्गीता ३.७,८.)

७. भावः - हे अर्जुन! यस्तु मनसात्वकूचक्षुश्रोत्र जिह्वाघ्राणज्ञानेन्द्रियाणि नियम्य वाक्पाणिपादपायूपस्थ नामभिः कर्मेन्द्रियैः कर्माचरणं निष्कामः करोति सः श्रेष्ठः इति कथ्यते।

विशेषांशः - निष्कामकर्मणा निर्मलो भवति। विरेचनार्थमौषधग्राहिणः, उदरस्थ दुर्मलस्य बहिर्गमन पर्यन्तं संयमनकरणे महाक्लेशप्रदम्। सर्वेषु दुर्मलेषु बहिर्गतेषु महाशान्तिस्यात्। तद्वत् हृदयगत दोषान् संयम्य साधुरिव उपविष्टस्य आत्मशान्तिः न लभ्यते। अतः मनोदोषविनाश पर्यन्तं सत्कर्माणि परमेश्वरार्पणबुद्ध्या कुर्वता तपोध्यानयुतेन भाव्यम्।

८. भावः - यस्यां कस्यामपि स्थितौ भवन्तु, तत्तदुचितयोग्यानुष्टानं हितकरं समीचीनं भवति। अतः शास्त्र विहितानुष्ठानमवश्यं कर्तव्यम्। यतः कर्मानाचरणात् जीवनयात्रापि न प्रसिद्ध्येत्।

विशेषांशः - अद्य लोके अनेकेसाधवस्सन्ति। तेषु सदाचारवन्तः सुखिनस्सन्ति। यस्य कस्यापि सत्कर्मणः अननुष्ठानवन्तः भोक्तुमपि भोजनविहीनाः सङ्कटे पतन्ति। एतादृशाः इहपरलोके दुखिताः भवन्ति।

## सङ्कीर्तनम्

हरिरसमविहारी स तु
सारमेयं मम श्रम संहारी
दया निवृत्त तनुधारी सं
शयातिशयसञ्चारी
कयाप्यजित विकारी



क्रियामुखकृपाणधारी
सदा मिथ्याज्ञानी स तु
मदोक्ति मताभिभानी
तदाश्रित सन्धानी स तु
तदा तदा चिन्ताशयनानि
परामृतसम्पादी
स्थिरानन्दास्वेदी
वरालापविवादी श्री
तिरुवेङ्कटगिरिदिव्यविनोदी।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ४२)

सम्पादकीयम्

# गुरुपूर्णिमा



व्यासपूर्णिमामेव गुरुपूर्णिमेति व्यवहरन्ति। व्यासपूर्णिमा आषाढशुद्धपूर्णिमायां आगच्छति। आदिभिक्षुः शङ्करः इति आदिकविः वाल्मीकिरिति आदिगुरुः वेदव्यासः इति आर्योक्तिः। आदिगुरुं वेदव्यासं स्मृत्वा पूजानिर्वहणदिनमिति मत्वा इमां व्यासपूर्णिमेति व्यवहरन्ति। गुं अज्ञानान्धकारं रु नाशयति इति गुरुशब्दार्थः। अज्ञानान्धकारं नाशयित्वा ज्ञानदीपप्रकाशकः गुरुरिति व्युत्पन्नार्थः। सर्वेषां जीविते गुरोः विशिष्टस्थानं वर्तते। मातापित्रोरनन्तरं गुरुस्थानं महत्। तादृशं गुरुं वयं व्यासपौर्णम्यां पूजयामः।

व्यासायविष्णुरूपाय व्यासरूपायविष्णवे।
नमो वै ब्रह्म निधये वाशिष्ठाय नमो नमः।।

इति व्यासविष्ण्वोः अभेदः प्रोक्तः। ''व्यासं वशिष्टनप्तरां शक्तेः प्रोक्तयक्लल्माषं। पराशरात्मजं वन्दे शुकंतात तपो निधिम्।'' व्यासः अनन्तवेदान् विभज्य पैलस्य ऋक्रूसंहितां, वैशम्पायनस्य यजुस्संहितां, जैमिनैः सामसंहितां, सुमन्तस्य अथर्वसंहितां बोधयित्वा तान् लोके व्यापयामासेति विष्णुमत्स्य भागवतवायुपुराणादिषु प्रोक्तम्। व्यासः न केवलं वेदविभागकर्ता, अष्टादशपुराणानि च रचयामास। ब्रह्मसूत्राणि व्यवृणोत्। लक्षश्लोकत्मकं महाभारतं भागवतञ्च प्रणिनाय।

परमपुण्यप्रदमिदं दिनं गुरुशिष्यबन्धं युगयुगेभ्यः व्यक्तीकरोति। सर्वविद्याकरः आदिदेवोऽपि प्रथमावतारे गुरुशुश्रूषाञ्चकार। सर्वज्ञोऽपि सः अज्ञानी इव गुरुन् पृष्ट्वा सर्वमधीतवान्। भगवानेव गुरोः शिष्यो भूत्वा विद्याभ्यास मकरोदिदिति कथ्यमानेसति मानवमात्राणां गुरुमुखतः विद्याभ्यासः अवश्यकर्तव्यः। ज्ञानप्रवर्धनं नाम अज्ञानदूरीकरणमेव। महर्षयः महात्मानः अपि वयमल्पज्ञाः इति वदन्ति। गुरुशिष्यसम्बन्धः परमपवित्रः शिष्येगुरोः वत्सल्यं शिष्यस्य गुरौ अपारभक्तिगौरवप्रदर्शनमनादिः। ज्ञानमार्गप्रयाणमिदमेव।

गुरुर्बह्मागुरुर्विष्णुः गुरुदेवो महेश्वरः।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः।।

गुरुः त्रिमूर्तिस्वरूपः। शुक्राचार्यः स्वमरणं ज्ञातोऽपि शिष्याय मृतसञ्जीवनी विद्यादानं शिष्यवात्सल्यं व्यक्तीकरोति। एवं एकलव्येन स्वाङ्गुष्ठदाने सति आयुधधारणमशक्यमिति ज्ञातमपि गुरुभक्तेः अपारनिदर्शनमिदम्। श्रीकृष्णः गुरवे सान्दीपाय अर्थितं मृतं गुरुपुत्रं पुनरज्ञीवितं कृत्वा यमादप्यानीय गुरवे सान्दीपनेः गुरुदक्षिणात्वेन ददौ। एतादृशशिष्यः न भूतो न भविष्यति। एवं पुराणेषु पवित्र गुरुशिष्य सम्बन्ध ज्ञापकाः बहवस्सत्ति। कौत्सवरक्तुगुरुशिष्य सम्बन्धः तेषु स्मरनीयः। अतः अस्मिन्शुभदिने गुरुन् व्यासभगवद्रूपाणि इति सम्भाव्य सकृत्य गुरोराशीर्वादं प्राप्तव्यम्।

अचतुर्वदनो ब्रह्मा दिवबाहुरपरोहरिः।
अफाललोचनश्शम्भुः भगवान् बादरायणः।।
नारायणसमारम्भां व्यासशङ्करमध्यमां।
अस्मादाचार्यपर्यन्तां वन्देगुरुपरम्पराम्।।



नीचाः कलहमिच्छन्ति शान्तिमिच्छत्ति साधवः।

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्,M.A., Ph.D., P.G.Dip in JMC

मुद्रापकः -
श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः,
ति.ति.दे.



सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*— प्रधानसम्पादकः*



स्वस्तिश्री चान्द्रमानश्रीपराभवनामसंवत्सर निजज्येष्ठप्रत्तिपत्ति गुरुवारादारभ्य-
आषाढबहुलविदिय-शुक्रवारपर्यन्तम् - २०२६

## जूलै - २०२६

सम्पुटिः-१३ सञ्चिका-०४



आगमेषु वैज्ञानिकत्वम् 06
- लिङ्गारेड्डि उमामहेश्वरी
ताल्लपाकान्नमाचार्यस्य सर्वजनाकर्षक कीर्तनानि 07
- डा. एन्.गुणवती
मरीचिमहर्षिवर्षतिरुनक्षत्रम् 09
- डा. के.कोटेश्वरय्य
जगन्नाथरथयात्रा 15
- आचार्य जि.पद्मनाभम् -
व्यासपूर्णिमा 18
डा.वि.माधवरेड्डि
अन्त्यकाले नारायणनामोच्चारणं सर्वपापप्रक्षालकं मोक्षलक्ष्मीप्रापकञ्च 19
- पि.माधवी
गुरुदक्षिणा (चित्रकथा) 20
- डा. के.सूर्यनारायणरेड्डि
द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः


मुखचित्रम् - उभयदेवीभ्यां सह श्रीमलयप्पस्वामिनः, विष्वक्सेनाः तिरुमल।
अन्तिमपुटचित्रम्ः- पूरीजगन्नाथक्षेत्रदेवतामूर्तयः बलरामः, सुभद्रा श्रीकृष्णः।
चित्रकारः श्री के.तुलसीप्रसादः।







### सङ्केतः
प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri_helpdesk@tirumala.org



एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-


राजपत्नी गुरोः पत्नी मित्रपत्नी तथैव च पत्नी माता स्वामाता च पञ्चैताः मातरः स्मृताः।



# आगमेषु वैज्ञानिकत्वम्

- कुमारी लिङ्गारेड्डि उमामहेश्वरी
चरवाणी - ९१८२०७५७६१

भगवतः रुपकल्पणार्थं निर्दिष्टं शास्त्रं आगमशास्त्रम्। वैष्णवशैवशाक्त-गाणापत्य-कौमारादिभेदेन विभिन्नं इदं शास्त्रम्।

आलयनिर्माण- विग्रहकल्प-विग्रहप्रतिष्ठा-अर्चन-स्नपन उत्सव प्रायश्चित्तादि अंशैः तत्तद्देवताप्राधान्येन ततद्देवतामन्त्रैः क्रियानुष्ठानपुरस्सरं आराधकः बाह्य - आन्तरवरिवस्यां संसाध्य आराध्यं दैवं परमात्मानं प्राप्तुं चिन्तनं ध्यानं च कर्तुं उपदिष्टमिदं शास्त्रम्। वेदमन्त्राणां विनियोगरूपत्वेन दर्शनवाङ्ग ये अद्वितीयं स्थानं प्राप्नोतीति नास्ति विप्रतिपत्तिः।

विविधागमग्रन्थेषु भगवतः शक्तिं संसाधयितुं तत्र तत्र वैज्ञानिकः मार्गः उपदिष्ट ज्ञायते। तदित्थं निरूप्यते -

**पञ्चपात्रद्रव्याणि - प्रयोजनम् -** देवस्याभिमुखे पञ्चपात्राणि संस्थाप्य तेषु कानिचनद्रव्याणि नैवेद्यादीनि जलपात्रे निक्षिप्य तेन जलेन आराधनं करणीयमिति आगमशास्त्रस्य उपदेशः। तानि द्रव्याणि-तावत् एला-लवङ्ग-उशीर-कर्पूर-अगरु-चन्दन-कुश-अक्षत-तिल-व्रीहि-यव-माष-प्रियङ्गु-सिद्धार्थक-पद्म विष्णुपर्णी-दूर्वा-अङ्कुरद्रव्याणि भवन्ति।

गुग्गुलु-अगरु-कोष्ठ-कर्पूर-उशीरादि द्रव्याणि धूपद्रव्याणीति, इक्षु-मधु-क्षीर-घृतद्रव्याणि मधुपर्काणि इति वासाधिकारग्रन्थे (२४ अध्याये) उपदिश्यते।

पात्रस्थ जलसहितद्रव्याणि भगवते उपयुज्य तीर्थरूपेण भक्ताः पिबन्ति चेत् आरोग्यं मनोल्लासः वाक्पटुत्वं मान्द्यनिर्मूलणं, बुद्धिवैशद्यञ्चेति ज्ञानोपयोगलक्षणानि समागमिष्यन्तीति आयुर्वेदभिषजः वदन्ति।

अतः अवश्यं देवालयः आगमशास्त्रं च मनोवैज्ञानिक शारीरकस्वास्थ्याधारभूतश्च भवतीति नास्ति विप्रतिपत्तिः।

**स्नपनद्रव्याणि-प्रयोजनम्-** पञ्चगव्य-मधु गन्धोदक हरिद्रोदक अक्षतोदक, फलोदक, कुशोदक रत्नोदक मन्त्रोदक ओषध्युदकानि स्नानद्रव्याणि भवन्तु इति क्रियाधिकारः (१३ अध्यायः) उपदिशति। एतैः द्रव्यविशेषैः मूर्तीणां बिम्बानां अभिषेकः अनुदिनं कर्तव्यं भवेत्।

स्नपनद्रव्यविनियोगद्वारा भूशुद्धिः शब्दशुद्धिः मनोनिश्चलत्वं क्रिमिकीटादीनां नाशः शरीरोल्लासः ज्ञानमार्गान्वेषणं इत्यादि फलानि अवश्यं सिद्धयन्तीति निश्चप्रचम्।

**होमद्रव्याणि प्रयोजनम् -** बिल्व-पलाश-न्यग्रोध-अश्वत्थ-उदुम्बर-खादिर-शमी समिद्धिः- होमेन बुद्धिवैशद्यं तेजः अकालमृत्युनिवारणं (रोगनिरोधः)चक्षुषः रोगनिवारणं चित्तनैर्मल्यसंसाधनं इत्यादि प्रयोजनानि (ज्ञानानि) अवश्यं साधयितुं इति वैखानसकल्पसूत्रे (गृह्यप्रश्नः १) उपदिशन्ति।

**अष्टबन्धनद्रव्याणि प्रयोजनम् -**

**शङ्खचूर्णं मधूच्छिष्टंलाक्षा त्रिफलमेव च।**
**कासीसं गुग्गुलं चैव चूर्णं रक्तशिलाकृतम्।**
**माहिषं नवनीतं च इत्यष्टबन्ध इति स्मृतः।।**

**क्रियाधिकारः ३५,२१-२२**

शिलाबिम्बं चन्दनं चेत् सुदृढत्वसाधनार्थं शङ्खचूर्णं मधूच्छिष्टं लाक्षा त्रिफलं कासीमं गुग्गुलं-रक्तशिलाचूर्णं - नवनीतं एतानि अष्टद्रव्याणि चूर्णीकृत्य लेह्यवत् संपाद्य तत्बिम्बस्य अष्टसुदिक्षु लेपनं भवतु इति तेन लेपनेन बिम्बं सुदृढत्वं भवतु तेन च एका उष्णशक्तिः समागमिष्यतीति तद्द्वारा बिम्बं तेजोविराजमानं स्यादिति आगमग्रन्थानां उपदेशसारः।

**उपसंहारः -** एभिः पात्रद्रव्य-स्नपनद्रव्य-होमद्रव्य-अष्टबन्धनद्रव्यैः देवालयः विज्ञानकेन्द्रं भवतीति तस्मिन् स्थापितानां देवतानां बिम्बानां तावत् अचिन्त्यदिव्याद्भुतनित्यनिरवद्ययौवनस्वभाव लावण्यातिशयेन तेजोविराजमानं भवतीति आलयः तावत् सुगन्धाघ्राणस्य मूलभूतः ज्ञानविज्ञानसमुपार्जनस्य सोपनभूतः भवतीति विज्ञाप्य विरमामि।

।अभ्युदयनिर्श्रेयसोपायाः आगमाः।

# ताल्लुपाकान्नमाचार्यस्य सर्वजनाकर्षक कीर्तनानि

- डा.यन्.गुणवती,
चरवाणी - ८९१९६२०२२६



**श्लोः - वेङ्कटेशपरब्रह्मरसतुन्दिलमानसं।
अध्यात्मविद्यामर्मज्ञं अन्नमाचार्यं नमाम्यहम्।।**

भक्तसुलभस्य भगवतः प्राप्त्यर्थं एकः पवित्रमार्गः भक्तिमार्गोनाम। भगवते अयं अङ्कितभावः एव। श्रीमद्भागवते नवविधा भक्तिरित्युक्ता। ते च क्रमेण श्रवणं, कीर्तनं स्मरणं, पादसेवनं, अर्चनं, वन्दनं, दास्यं, सख्यं, आत्मनिवेदनं इति।

**श्लोः - श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।**

एतेषु मार्गेषु यःकोपि एकः मार्गः अनुसृतश्चेत् ईश्वरस्य अनुग्रहेण धन्यः भविष्यति। तेषु कीर्तनभक्तिः सर्वाधिक महत्वपूर्णा अस्ति। कलियुगे ईश्वरस्य नामसंकीर्तनमेव प्रशस्तं भवति। ईश्वरस्य नामजपद्वारा मानसिकशान्तिः वर्धते, परलोके च मुक्तिः। नारदः तुम्बुरः, प्रह्लादः इत्यादयः बहवः भगवतः कीर्तनेन तस्य अनुग्रहं प्राप्तवन्तः। तेषु ताल्लपाक अन्नमाचार्यः अपि प्रमुखः आसीत्। कलियुगदेवः श्रीवेङ्कटेश्वरः स्वयमेव अन्नमाचार्यं पृष्ट्वा आत्मानमधिकृत्य कीर्तनानि विरचय इति आदिदेश इति वदन्ति। श्रीताल्लपाक अन्नमाचार्यः आन्ध्रप्रदेशस्य कडपजिल्लायां ताल्लपाके नारायणसूरि लक्ष्माम्बयोः १४०८ तमे वर्षे जन्म अवाप। अष्टवर्षीयः सः तिरुमल नगरं प्रति प्रस्थितवान्। मार्गे साक्षात् श्रीनिवासस्य पत्न्याः अलमेलुमङ्गादेव्याः दर्शनमवाप। सप्तपर्वतान् आरुह्य वेङ्कटेश्वरस्य दर्शनं प्राप्त्वा परमानन्दपारवश्यपदं प्राप्य वैष्णवदीक्षां स्वीचकार। षोडशवर्षे ताल्लपाकं प्रत्यागतः तिम्मक्का अक्कलाम्बयोः पाणिग्रहणं चकार। स्वयं भगवतः वेङ्कटेश्वरस्वामिनः अनुरोधेन सः तस्य ९५ वर्षपर्यन्तं प्रतिदिनं एकं कीर्तनं लिखतिस्म। तस्मिन् समये सः अन्यदेवतासु अपि कीर्तनानि विरचितवान्। सः अहोबिलमठ संस्थापक आदिवर्ण शठगोपात् आध्यात्मिक वेदान्त रहस्यानि ज्ञातवान्। तिरुमल दर्शनानान्तरं तेन बहुवारं दृष्टं पुण्यक्षेत्रं अहोबिलमेव। तत्र स्थितस्य नृसिंहस्वामिनः कीर्तनान्यपि रचयामास। संकीर्तनद्वारा अन्नमाचार्यः तत्काले बहुलोकप्रियतामवाप। तिरुमलक्षेत्रे प्रतिशुक्रवासरे आयोजिता स्वामिनः अभिषेकसेवा श्रीअन्नमाचार्येण एव प्रारब्धासीत्। तत्परम्परा अद्यापि प्रचलति। सुप्रभातसेवातः एकान्तसेवा पर्यन्तं विविध सेवासम्बन्धीनि बहूनि कीर्तनानि तिरुमलक्षेत्रे भगवतः नित्यसेवासु श्रूयन्ते। अन्नमाचार्यस्य पुत्रपौत्रौ पेद्दतिरुमलाचार्यः चिन्नतिरुमलाचार्यः अपि तन्मार्गमेव अनुसृत्य भगवतः कीर्तनानि लिखितवन्तौ आस्ताम्। अन्नमाचार्यस्य जीवितविशेषानपि लोकविदितान् कृतवन्तौ।

अलमेलुमङ्गपत्न्या महता उत्साहेन पृष्टानि अन्नमाचार्येण लिखितकीर्तनानि तत्काले महत्प्राचुर्यं प्राप्तानि। परन्तु तदनन्तरं किञ्चित्कालान्तरं अदृश्यान्यभवन्। १९२२ तमे वर्षे ताम्रफलकेषु उत्कीर्णानि तिरुमलक्षेत्र वेङ्कटेश्वरस्वामिमन्दिरस्य अन्तर्भागे एक लघुप्रकोष्ठे निगूढानि आसन्।

तिरुपतिदेवस्थान श्रीबालमुरलीकृष्णः श्रीनेदुरिकृष्णमूर्तिः, श्रीमती यम्.यस्.सुब्बलक्ष्मी इत्यादीनां कृषिफलितेन प्रजानां पुरतः प्रत्यागताः। अन्नमाचार्यः ३२,००० कीर्तनानि विरचितवानिति ज्ञायते। तेषु केवलं १२,००० एव उपलभ्यन्ते। तेषु कीर्तनेषु अधिकभागः श्रीवेङ्कटेश्वरस्य अलमेलुमङ्गायाः अमलिन शृङ्गारकीर्तनपरः एव वर्तते। शेषाः आध्यात्मिककीर्तनरूपेण वर्गीकृताः सन्ति। तानि सर्वाणि भक्तिरसौन्नत्यं बोधयन्ति। तान्येव वैराग्यकीर्तनानि इत्यपि व्यवह्रियन्ते। तेषु इतरदेवताकीर्तनान्यपि सन्ति।

श्रीवेङ्कटेश्वरस्वामी सहस्राधिकैः संकीर्तनैः अन्नमाचार्येण स्तुतः गात्रृन् तारयति। पल्लवि सहित चरणयुक्त सहस्राधिक कीर्तनानि विरच्य पदकवितापितामहः इति बिरुदं लेभे श्रीमानन्नमाचार्यः। भविष्यद्वाग्गेयकाराणां कृते मार्गदर्शकः अपि च अभवत्। त्यागराजः, मुत्तुस्वामिदीक्षितः इत्यादिमहान्तः पुरुषाः अपि अन्नमाचार्यस्य रचनाशैलीं अनुसृतवन्तः। तस्य कीर्तनानि न केवलं आध्यात्मिकभक्ति विषये प्रसिद्धानि अपि तु आत्मानं चालनं कर्तुं कारणभूतानि संगीतसौन्दर्य विषयेपि प्रसिद्धानि। अपि च वर्णनावैभवमपि तस्य कीर्तनेषु सन्दृश्यते। कीर्तनेषु एका पल्लवी त्रीणि अथवा अधिकानि चरणानि भवन्ति। प्रत्येकचरणस्य अन्ते पल्लवी पुनरावृता भवति।तस्य कीर्तनानि सर्वाणि आध्यात्मिकभावसम्पत्पूर्णानि भवन्ति। तस्य वेदसारकीर्तनैः अन्नमाचार्यः वैदतत्वज्ञः इति अस्पृश्यताविरोधकीर्तनैः अभ्युदयभावकविः इति ज्ञायते।

श्रीमानन्नमाचार्यः लौकिक संस्कृतभाषायामपि कीर्तनानि विरचितवान्। यद्यपि तस्य कीर्तनेषु आध्यात्मिककीर्तनानां संख्या अल्पा किन्तु तेषां कीर्तनानां प्रत्येकस्थानमस्ति। शृङ्गारकीर्तनेषु ग्राम्यपदानां प्रयोगः अङ्गीकृतो भवति। किन्तु आध्यात्मिककीर्तनेषु ग्राम्यपदानां स्थानं नस्यात्। आध्यात्मिक कीर्तनेषु यतिप्रासयोः उपस्थितिः दृश्यते।अन्नमाचार्यस्य संस्कृताध्यात्मिक कीर्तनेषु वेङ्कटेश्वरेण सह इतरदेवतानामपि कीर्तनानि सन्ति। ते च यथा श्रीरामस्य कीर्तनानि श्रीकृष्णस्य कीर्तनानि नृसिंहस्य कीर्तनानि तुलस्याः कीर्तनानि राधायाः कीर्तनानि इत्यादि।



अन्नमाचार्यः इतरदेवतानां स्तोत्राणि, वेङ्कटेश्वरस्तोत्राणि विरच्य इतरदेवतास्तोत्रेषु अपि वेङ्कटेश्वरस्य अभेदमेव वर्णयति। तत्र श्रीरामः वा श्रीकृष्णः वा नृसिंहः वा तुलसी वा राधावा अथवा अन्यदेवताः वा वेङ्कटेश्वरस्य नाम तत्र अवश्यं भवति। यथा -

**''निरति श्रीवेङ्कटेश जिजभक्त रक्षक**
**धरणिजा समेत दशरथरामा''**
**इति श्रीरामस्य संकीर्तने -**
**''श्रीकर गुणनिधि श्रीवेङ्कटेश्वर**
**नाकजन नुत नमो नमो''**
**इति श्रीकृष्णस्य संकीर्तने -**
**''कान्ति श्रीवेङ्कटगिरिसिंहं**
**चिन्तितघन संसिद्धि नृसिंहं''**
**इति नृसिंहस्य संकीर्तने -**
**''तिरुवेङ्कटेश तत्करुणागुणिना**
**वररूप नवचन्द्रवदनौ तुलसी''**
**इति तुलस्याः संकीर्तने -**
**''श्रीवेङ्कटगिरिदेवकृपा मु**
**द्रा वैभवनाथा राधा''**

इति राधायाः संकीर्तने अपि श्रीवेङ्कटेश्वरस्य नामकीर्तनं अवश्यं भवति। सहस्राधिककीर्तनानि विरच्य कलियुगे देवदेवस्य श्रीवेङ्कटेश्वरस्य कृपां प्राप्तुं भक्तेभ्यः उपकृतिं चकार। अतः श्रीताल्लपाकअन्नमाचार्ये अस्माभिः सर्वैः कृतज्ञातावद्भिः भाव्यम्।



# मरीचिमहर्षि

## वर्षतिरुनक्षत्रम्

18.07.2026

- डा.के.कोटेश्वरय्य
चरवाणी-९९८५१२३२६२

मरीचिमहर्षेः वर्षतिरुनक्षत्रम् जूलैमासे १८ तिथाविति ज्योतिष्कैः निर्दिष्टम्।

सृष्टिकर्ता ब्रह्मा मनश्शान्तिरहितः स्वसृष्टजीवराशि वंशपरम्परायां जगति परिपूर्णत्वाभावात् दुःखितः स्वसमानान् संसृज्य तान् सृष्टिव्याप्तेः नियोक्तुममन्यत। अत एव स्वसमानघनान् प्रजापतीः, मुनिश्रेष्ठान् जगत्प्रजापरिपूर्णतायै हेतुभूतान् महामहान् स्वमानससृष्ट्या ससर्ज। ते एव भृगुपुलस्त्य पुलह क्रतुः अङ्गिराः मरीचिः दक्षः - अत्रिः वसिष्ठः इति महात्मानः नवब्रह्माणः इति विष्णुपुराणगाथा। एवं सृष्टिकार्ये आत्मनः साहय्यत्वेन सृष्टिपरिपूर्णतायाः शक्तिसम्पन्नत्वेन सृष्टेषु ब्रह्ममानसपुत्रेषु नवब्रह्मसु मरीचिमहर्षिरेकः। मरीचिः स्वानुजैस्सह पित्राज्ञामनुसृत्य तपः आचरन् ब्रह्मसन्निधौ विद्यमानः आह्वानक्षणादेव आगच्छन् ब्रह्मणः सेवां कुर्वन् तदादेशानाचरति स्म।

**परिणयः -**

गच्छति काले कर्दमप्रजापतेः देवहूत्यां नव पुत्र्यः कपिलनाम्ना विष्णुमूर्तिः पुत्ररत्नञ्च जाताः। कपिलस्य जननादेव सर्वलोकमहोत्सवः बभूव। तस्मिन् महोत्सवे देवहूतेः तत्त्वं बोधयितुं तस्याः गर्भे उदयिष्यत्परब्रह्मस्वरूपनारायणं द्रष्टुं नारदसनकसनन्दन मरीचिप्रमुखैःमुनिगणैः ब्रह्मा तत्र आजगाम। तत्र ब्रह्मा कर्दमं देवहूतिं दृष्ट्वा हेपुण्यदम्पति! भवतां योगः महायोगः। निष्कल्मषतया त्वत्कृतविष्णुपूजा पुत्ररूपं सत्फलं बभूव। यूयं चरितार्थाः। साक्षात्पुण्यरूपिणीः युवयोः नवपुत्रीः शीलव्रताचारसम्पन्नसकललोकमुनिवरेण्यमहात्मनां नवब्रह्मणां विवाहे ददन्तु। तेभ्यः प्रजासृष्टिः बहुधा वर्धिष्यति इति हितमुपदिदेश। पश्चात् विष्णुमूर्तिरिव कपिलरूपे तयोः पुत्रत्वेन जनिष्यतीति विशदीकृत्य तन्महात्मना क्रियमाणभविष्यत्कृत्यानि विवृत्य कपिलं स्तुत्वा मरीचिं कर्दमगृहे विवाहार्थं निवेश्य ब्रह्मानारदसनकसनन्दनादिभिः स्वधाम ययौ। पश्चात् कर्दमप्रजापतेः

अनायकाः विनश्यन्ति नश्यन्ति बहुनायकाः स्त्रीनायकाः विनश्यन्ति नश्यन्ति शिशुनायकाः।

ब्रह्मणः आदेशमनुसृत्य स्वसुताभ्यः विवाह महोत्सवं निर्णीय नवब्रह्मभ्यः व्यजिज्ञपत्। भूतभविष्यद्वर्तमानवेदिनः ते महानुभावाः विवाहवराः भूत्वा कर्दमगृहं जग्मुः। पश्चात् दिव्यवैभवोपेततया कर्दमप्रजापतिः स्वस्थानस्थमरीचिमहर्षेः प्रथमपुत्रिकां दिव्यसुन्दरीं अत्रेः अनसूयां, अङ्गिरसः श्रद्धां, पुलस्त्यस्य हविर्भुवं, पुलहस्य गतिं, क्रतुमहर्षेः प्रियां भृगोः ख्यातिं, वसिष्ठस्य अरुन्धतीं अधर्वणः शान्तिं दत्वा निजकुलाचारसरण्या परिणयकार्यं कृत्वा कृतदारापरिग्रहेभ्यः जामातृभ्यः सकलगौरवाणि कृत्वा तत्तदाश्रमदिव्यप्रदेशान् प्रेषयामास। एवं मरीचिः कलां धर्मपत्नीत्वेन परिजग्राह।

**सन्ततिः -**

कलायुतः मरीचिमहर्षिः रोहिण्या चन्द्रः इव प्रकाशमानः स्वाश्रमागत्य गृहस्थधर्मनिर्वहन् तपोध्यानानुरक्तः आदर्शगृहस्थाश्रमे कालं यापयतिस्म। कलापि बहुधा भर्तृशुश्रूषामाचरन्ती छायेवपतिमन्वगच्छन्ती पतिव्रतातिलकं सतीतपस्विनी जीविताभ्यासपरा बभूव। कदाचित् मरीचिमहर्षिः भार्यामुद्दिश्य हे साध्वि! मत्पिता तव श्वसुरः ब्रह्मा निरन्तरायप्रजासृष्टेः मां जनयित्वा त्वां भार्याश्चकार। अतः कीदृशी सन्ततिरावश्यकीति पृच्छस्वेत्यपृच्छत्। कला अस्मदधिकः सर्वजीवराशिसृजनसामर्थ्ययुतपुत्रं समस्तलोककीर्तनीयां उत्तमपुत्रिकां प्रसादयेत्यपृच्छत्। मरीचिः कलायाः अभिरुचिमङ्गीकृत्य निरुपमनिष्टातिशयेन तपः आचरन् भार्यां स्वपरिचर्यायां नियुज्य परमपवित्रशरीरां कृत्वा पश्चात् सुमूहूर्ते तस्याः कामकेल्या परमतृप्तिं दत्वा तां गर्भवतीश्चकार। परमसन्तोषभरिता कला पवित्रगर्भं धृत्वा महोत्साहिनी भूत्वा कालक्रममनुसृत्य पुत्रमसूत। पश्चात् मरीचिः पुत्रस्य जातकर्मादीनि कृत्वा कश्यपः इति नामचकार। कश्यपः शुक्लपक्षचन्द्रः इव वर्धमानः युक्ते वयसि दक्षप्रजापतिपुत्रिकाः परिणीय सर्वभूतसंसृष्टिं चकार। काले गच्छति मरीचिदयया पुनः गर्भवती भूत्वा नवमासानन्तरं पुत्रिकां प्रसूतवती। जननादेव पूर्णिमाचन्द्रः इव प्रकाशमाना इति पिता पूर्णिमेति तस्याः नाम चकार। कालक्रमेण पूर्णिमा जन्मान्तरे हरिपादप्रक्षालनकारणात् गङ्गानाम्नी जाता वर्धमाना देवकुल्यनाम्नीं दुहितरं अखिलविष्टपव्यापकनाम्ना विरजनामकपुत्रमवाप। तेभ्यः भूतसन्ततिरवर्धत। एवं मरीचिः कलया सन्तानवान् चरितार्थजीवनश्चभूत्वा अप्रकाशत। (भागवत चतुर्थस्कन्धकथा)

**मरीचिस्मृतिः -**

मरीचिः महाज्ञानी विरागी महातपस्वी स्मृतिकर्ता च। मरीचिस्मृतिनाम्ना धर्मशास्त्रमेकं प्रसिद्धं दृश्यते।

अह्निक-अशौच श्राद्धप्रायश्चित्तव्यवहारविषयेषु मरीचिस्मृतेः महोन्नतस्थानं वर्तते। मिताक्षर अपरार्क - स्मृति चन्द्रिकाग्रन्थाः मरीचिस्मृतिं प्रस्तुवन्ति।

**स्मृतिविषयाः -**

सप्तम्यां रविवारे च गृहीजन्मदिने तथा

**भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलतर्पणम् ।।**
**नभो नभस्ययोर्मध्ये सर्वानवद्यरजस्वालाः।**
**तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणम्।।**
**इति दर्पणादिकविषयः।**
**स्थावरे विक्रियावधाने विभागे ।**
**दाने एवच। प्रतिग्रहेचक्रीते च नालेख्या सिद्धयति क्रिया।।**

अविज्ञात निवेशत्वाद्यत्र मूल्यं न लभ्यते हानिस्तत्र सयाकल्प्या क्रेतुदाष्ट्रिकयोर्द्वये। इत्यादिश्लोकाः व्यवहाराध्याये मरीचिस्मृतितः अपरार्कस्मृतिचन्द्रिका ग्रन्थे उदाहृताः। ''गोप्यप्रत्यय अजानाधिरिति'' चतुर्विधत्वेन मरीचि स्मृतौ वर्तते। मरीचिस्मृतिः गद्य-श्लोकोभयसमन्वितेति अपरार्कग्रन्थे उदाहृतम्। भारते ऋष्याश्रमेषु वेदविश्वविद्यालयेषु संस्कृतकलाशालासु मरीचिमहर्षिवर्षतिरुलक्षत्रोत्सवः चित्रपटपूजा फलपुष्प समर्पणादिना वैभवोपेततया निर्वाह्यते।









# तिरुचानूरु
# श्रीसुन्दरराजस्वामिनः अवतारोत्सवाः
# 05.07.2026 तः 07.07.2026 पर्यन्तम्

## श्रीनिवासमङ्गापुरम्
## श्रीकल्याणवेङ्कटेश्वरस्वामिनः साक्षात्कारवैभवोत्सवाः

17.07.2026 तः 19.07.2026 पर्यन्तम्





तिरुपतिस्थ
## श्रीकपिलेश्वरस्वामिनः पवित्रोत्सवाः
26.07.2026 तः 28.07.2026 पर्यन्तम्













चित्तूरुजिल्ला, कुप्पंनगरस्थ प्रसन्नतिरुपति गङ्गाम्बायाः यात्रा सन्दर्भे 20.05.2026 तिथौ ति.ति.दे. पक्षतः श्रीवेङ्कटेश्वरस्वामिनः पूज्यबहुमानं समपर्ययन्तः आन्ध्रप्रदेशमुख्यन्त्रिणः श्री गौरवनीयनाराचन्द्रबाबुनायुडु दम्पती, तत्र भागं गृहीतवन्तः ति.ति.देवस्थानकार्यनिर्वहणाधिकारी श्री सि.हेच्. वेङ्कय्यचौदरी ऐ.आर्.यस्., अपि च पालकमण्डलीसभ्याः अन्ये च अधिकारिणः। एतेषां सर्वेषां मनोहरदृश्यम्।




डिल्लीनयाति हेल्त् केर् पुनः रीसर्च् आग्राप्रैवेट्लिमिटेड् संस्था 30.05.2026 तिथौ ति.ति.देवस्थानस्य रू.1.13 कोटिपरिमितं अमूल्य ओलेक्ट्रा एलेक्ट्रिक् चतुश्चक्र यात्रिकप्रयाणबसूसम्बन्धपत्राणि कुञ्चिकाश्च दानतया स्वीकुर्वतः ति.ति.देवस्थानपालकमण्डल्यध्यक्ष श्री बि.आर.नायुडु महोदस्य ति.ति.देवस्थानानुबन्ध कार्यनिर्वहणाधिकारिणः श्री सि.हेच्. वेङ्कय्यचौदरिऐ.आर्.यस् महोदयस्य च मनोहरदृश्यम्।



ति.ति.देवस्थान श्रीवेङ्कटेश्वरप्राणदान ट्रस्टोः 06.05.2026 तिथौ ति.ति.देवस्थान पालकमण्डल्यध्यक्षेभ्यः श्री वि.आर्.नायुडु महोदयेभ्यः रू.2.50 कोटिपरिमितधनं दानतया समर्पयन्तः पश्चिमबेङ्गाल् राष्ट्रम् कोलकत्ता-हेमाद्रिफौण्डेसन् सम्बन्धि महाशयानां मनोहरदृश्यम्।



हनुमज्ञयन्तीसन्दर्भं पुरस्कृत्य तिरुमलस्थ जापालि - आञ्जनेयस्वामिभ्यः ति.ति.देवस्थान पक्षतः 12.05.2026 तिथौ पीताम्बराणि समर्पयतः ति.ति.देवस्थान कार्यनिर्वहणाधिकारिणः श्रीमुद्दाडरविचन्द्रऐ.ए.यस्., महोदयस्य, अनुबन्धकार्यनिर्वहणाधिकारिणः श्री सि.हेच्.वेङ्कय्यचौदरिऐ.आर्.यस्.,महोदयस्य अन्येषां अधिकारिणश्च मनोहरदृश्यम्।



ति.ति.देवस्थान प्राणदानट्रस्टोः 12.05.2026 तिथौ मुम्बैभक्तः श्रीविजयरमेशचन्द्रः रू.1.03 कोटिपरिमितदानं ति.ति.दे. अनुबन्धकार्यनिर्वहणाधिकारिणे श्री सि.हेच्. वेङ्कय्यचौदरिऐ.आर्.यस्., महोदयाय समर्प्यमाणमनोहरदृश्यम्।



# जगन्नाथरथयात्रा

**16.07.2026**

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६



भारतेसुप्रसिद्धपूरीनगर्यां रथायात्रायाः दिनद्वयात् पूर्वं अमावास्यादिने नूतनदेवतामूर्तीनां नेत्रोत्सवः प्रवर्तते। यथाविधिपूजाः निर्वाह्यन्ते। अनन्तरदिने प्रजाभ्यः नवयौवनदर्शनं जूलै तिथौ लभ्यते। अषाढशुक्लविदियातिथौ पाण्डाः सङ्गीततालध्वनिभिः उदयकालपूजां निर्वाह्य (मनिमा) जगन्नाथेति महानिनादान् कुर्वन्तः विग्रहान् चालयन्ति। आनन्दवीथी अरुणस्तम्भमार्गे अत्यन्तकोलाहलवातावरणे रथं पुरवीथीषु चालयन्तः रथपश्चाद्भगात् आनीय रत्नपीठे विग्रहान् अलङ्कुर्वन्ति। उत्सवमेनं 'पहण्डीति' वदन्ति। अस्यां दशायां कुलमतभेदानां न स्थानमस्ति। गण्डिचालालयं प्राप्तुं सिद्धाः सुभद्राजगन्नाथबलभद्राः रथारूढाः भवन्ति। तदा भूतले विष्णुरिव गौरवाभिमानं स्वीकुर्वन् पूरीनगर राजा पल्याङ्के तत्स्थानं यथा प्राप्तः तथा सभ्याः वियत्तलस्पर्शिनः भवन्ति। परमात्मनः पुरसेवकत्वं प्राप्तः सः महाराजः स्वर्णमार्जनीभिः रथान्तः शुभ्रं करोति। इदमेव चेरापहरा, इति वदन्ति।

**रथनिर्माणम्** - नवीनालये जगन्नाथबलभद्रसुभद्रादेवताः निवेशिताः। जगन्नाथार्थं अन्यत् मन्दिरम् निर्मितम्।

रथायात्रायाः षष्टिदिनेभ्यः पूर्वं वैशाख बहुलविदियातिथौ निर्माणकार्याणि प्रारभ्यन्ते। पूरीमहाराजः पुरोहितानाहूय दारुसामाग्रीमानेतुं, आदिशति। सामन्तराजः दनपल्लापूर्वमेव तदर्थं उपयोगवृक्षभागान् संसिद्धान् करोति। तेभ्यः वृक्षेभ्यः वेदपण्डितैः शान्तिनिवर्हणानन्तरं जागरुकतया संच्छिद्य १०७२ काण्डान् पूरीनगरं प्रापयन्ति।निर्माणार्थं १३ सहस्त्रपरिमितघनहस्तपरिमाणदारु आवाश्यकं भवति। प्रधान पुरोहितनेतृत्वे शिल्पनिपुणैः अक्षयतृतीयायां रथनिर्माणं प्रारभ्यते। प्रथमतः वृक्षकाण्डान् २१८८ खण्डत्वेन कुर्वन्ति। तेषु ८३२ खण्डान् जगन्नातरथार्थं ७६३ खण्डान् बलभद्ररथार्थं ५९३ खण्डान् सुभाद्रादेवीरथार्थं विनियोजयन्ति। निर्माणे यन्त्राणि नोपयुज्यन्ते। जगन्नाथरथः नन्दिघोषः औन्नत्यं ४६ हस्तप्रमाणम् अस्य षोडश चक्राणि वर्तन्ते। एकैकस्य चक्रस्य औन्नत्यं षट्हस्तप्रमाणम्। सारथेः नाम दारुकः। बलभद्रस्य रथः तालध्वजनामकः। सुभद्रादेवीरथनाम देवदलन् इति। निर्माण परिपूर्णानन्तरं रथान् यात्रायाः एकदिनपूर्वमेव आलयप्राग्भागस्थसिंहद्वारसमीपे निवेशयन्ति।

रथाकर्षणाय (रथंचालयितुं) एकैकस्य रथस्य २५० हस्तपरिमाणदीर्घत्वविशिष्टानि अष्टाङ्गुलीयरज्जून् निबध्नन्ति।

**घोषयात्रा** - रथरज्ज्वाकर्षणे प्रपञ्चप्रख्यातरथयात्रा प्रारभ्यते तस्मिन् समये स्वामिनं "पतितपावनः" इति वदन्ति। तत्क्षणार्थं

निरीक्षमानलक्षाधिकभक्ताः महोत्साहेन पुरतः गच्छन्ति। गगनस्पर्शिजयजयध्वनीनां मध्ये रथाः वेगेन चलन्ति। त्रिकिलोमीटरुदूरस्थ गुण्डिचालयं प्राप्तुं द्वादशघण्टासमयः आवश्यकः। गुण्डिचावनागमनानन्तरं तस्यां रात्रौ आलयस्य बाह्ये एव रथेषु मूलविराड्देवस्य विश्रान्तिः दीयते। अनन्तरदिने प्रातः सङ्गीतवाद्यतालघोषैः आलयान्तः नयन्ति। स्वामी तत्र सप्तदिनपर्यन्तं वर्तिष्यति। पञ्चमदिने असक्तिकरविशेषः सम्भवति। आलयान्तः स्वामी आत्मानं न तेन सह नीतवानिति स्वामिनि कोपयुक्ता लक्ष्मीः गुण्डीयालयबाह्यप्रदेशादेव वक्रदृष्ट्या दृष्ट्वा महाकोपेन स्वामिरथं किञ्चित् ध्वंसं कृत्वा  तस्मात् स्थानात् गतवती। एनं कोपवृत्तान्तं लक्ष्म्या एव कृतमिव पुरोहिताः एव कुर्वन्ति। तद्दिनं हीरापञ्चमीति वदन्ति। सप्ताहदिनपर्यन्तं गुण्डियादेव्यातिथ्यं सुभद्रा स्वीचकार। बलभद्राजगन्नाथौ दशम्यां निवृत्तप्रयाणं कुर्वन्ति। एतद्भहुदायात्रेति वदन्ति। जगन्नाथस्तु मार्गे अर्धासन-आलयसमीपे मधुरप्रसादान् स्वीकरोति। मध्याह्नसमये रथत्रयं आलयं प्रापयन्ति। अनन्तरदिनैकादश्यां स्वामिनं स्वर्णाभरणैः अलङ्कृत्य भक्तेभ्यः दर्शनभाग्यं कारयन्ति। इदं दृश्यमद्वितीयंमनोरञ्जकं भवति। द्वादश्यां पुनः विग्रहानां रत्नसिंहासने प्रतिष्ठापनात् रथयात्रा परिसमाप्तिमेति।

स्वाम्याभावात् सौन्दर्यहीनं पूरीनगरं जगन्नाथागमनात् नव्यकलया शोभायमानंचित्ताकर्षकं भवति। तत्र १८७० वर्षे निर्मिताः शिलासिंहाः, प्रथमपंक्तौ अरुणस्तम्भसहित सिंहद्वारः अतीव मनोहरः संदृश्यते। पद्मावेषालङ्कारः, पद्मगर्भे जगन्नाथबलभद्रसुभद्राणां उत्सवविग्रहाः मनोरञ्जकाः दृश्यन्ते।

**श्लोकः -**

**त्वयिसुप्तेजगन्नाथ! जगत्सुप्तं भवेदिदम्।।**
**विबुद्धेत्वयि बुध्येत तत्सर्वं सचराचरम्।।**

हे जगन्नाथ! जगत्पालक! विष्णो! इति श्लोकेन अनेन हरिं स्तुत्वा नित्यं यथासाध्यं नैवेद्येन स्वामिपूजाकृताचेत् अष्टैश्वर्याणि सिद्धयन्तीति पुरोहितवचनम्। वर्षेवर्षे जूलै मासे पूरीजगन्नाथरथयात्रा एवमेव प्रारभ्यते।

**विश्वासः -** पूरीपट्टणे द्वादशदिनपर्यन्तं प्रवर्तमानजगन्नाथ, बलभद्रसुभद्राणां रथयात्रासमये भागं गृहीतवन्तः भक्ताः, अथवा पूरींगन्तुं असमर्थाः भक्ताः, विष्णुमूर्तिं मन्त्रपूर्वकं यदि अर्चयन्ति तेषां ईतिबाधाः नश्येयुरिति विश्वासः। रथयात्रा दिनेषु ७, वा ९ दिनानि एकवारमेव भुक्त्वा शुचितया विद्यमानश्चेत् सकलसम्पदः भक्ताः प्राप्स्यन्तीति पण्डितानामभिप्रायः। एवं रथयात्रा द्वादश दिनेषु आनुकूल्येषु ३,५,७,९ दिनेषु नित्यं सायंसमये षट्घण्टावादनसमये समीपस्थनारायणस्वाम्यालयदर्शनं कृत्वा घृतेन दीपद्वय प्रज्वालनात् कामितकार्याणि सिद्ध्यन्तीति विश्वासः।

प्रत्यहं दीपं प्रज्वालयित्वा अन्तिमदिने स्वामिनं अर्चयित्वा पञ्च अथवा नव व्यक्तिभ्यः हरिद्राकुङ्कुमशर्करासहित - घृतान्नदानात् भक्ताः आर्थिकसमस्याभिः ईतिबाधभिः विमुक्ताः सुखसन्तोषान् प्राप्स्यन्तीति प्रबलविश्वासः। कदाचित् जगन्नाथरथयात्रादर्शनाभिलाषिणः प्रदेशमिमं द्रष्टुं सहस्राधिकजनाः शताधिकमैल्सुदूरात् दुर्गमपर्वतारण्यनदीः तीर्त्वा सोत्साहमागच्छन्तिस्म। अद्य प्रयाणसौकर्याधिक्यात् पूरींप्राप्तुं श्रमः नास्ति। देशे अतिपवित्रक्षेत्रेषु एकोऽयं पुराणमतग्रन्थेषु प्रस्तूयमानः दृश्यते। जगन्नाथस्वामिमाहात्म्यं पुराणानि बहुधाकीर्तयन्ति।

ब्रह्माण्डदेवालये जगन्नाथेन सह सोदरबलरामसोदरीसुभद्रा विग्रहाः प्रतिष्ठिताः। अयं देवालय माकिं २१४ अङ्गुलौन्नत्यविशिष्टः। एनं देवालयं अष्टमशतब्द्यन्ते पालकः गङ्गावंशराजा द्वितीयमहाशिबगुप्तः ययातिः निर्ममे इति प्रतीतिः वर्तते। परन्तु चारित्रकारनिर्णयमनुसृत्य १२ शताब्द्यां गङ्गावंशीयचोडगङ्गदेवः निर्ममे इति केषाञ्चिद्वादः। परन्तु अस्यदेवालयस्य निर्माणमधिकृत्य एका कथा प्रचारे वर्तते जगन्नाथस्वामिरथयात्रावीडियो, अत्र आलये प्रतिष्ठितविग्रहाः इतः पूर्वं विद्यमानाः कस्य कालस्य सम्बन्धिनः इति ज्ञातुं वक्तुमशक्यम्। प्रथमतः आलयमिमं इन्द्रद्युन्ममहाराजः निर्ममे इति वदन्ति। इन्द्रद्युन्ममहाराजस्य, स्वामिनः स्थानं सुस्पष्टं कुत्रचित् विद्यते इति चिन्ता आगता। एतदर्थं स्वामिस्थित स्थलान्वेषणाय कांश्चित् नियुयोज। तेषु विद्यापतिनामकः युवब्राह्मणः स्वान्वेषणे कानिचन दिनानि अटव्यां सञ्चरन्

कस्याश्चिज्ज्ञातेः प्रभोः विश्वावसोः गृहे अतिचिरमासीत्। विश्वावसोः ललितेति सुन्दरी तनया आसीत्। विद्यापति ललितयोः परस्परप्रेम्णा तयोः विवाहोऽपि निर्वर्तितः।

ततः कदाचित् विश्वावसुः रहस्यतया कञ्चनदेवं रहस्य स्थले आराधयतिस्म। विद्यापतिः भार्यायाः ललितायाः साहाय्यात् विश्वावसुना पूज्यमानदेवालयगुहां अतिक्लेशात् अजानीत्। विद्यापतिः गृहस्थं भगवद्विग्रहं दृष्ट्वा स्वान्वेषणफलं सफलं जातमिति तद्देवदेवं तत्रैव प्राप्तोऽस्मीति तस्य मनसि अस्फुरत्। स्वान्वेषणं समाप्तमिति कस्मिंश्चिद्दिने तां देवता मूर्तिमपहृत्य पूरीं पलायितः। ततः इयं संघटाना राजाज्ञानुसारं प्रवृत्तेति इन्द्रद्युम्नमहाराजः एव विश्वावसोः क्षमापणमवोचत्। विग्रहं तेन निर्मितालये प्रतिष्ठितुं विश्वावसुरपि अङ्गीचकार। परन्तु स्वामी स्वप्ने दृष्टः स्वमूर्तिः दारुणा एव निर्मेया इति आज्ञां ददौ। विग्रहं निर्मातुं कश्चन भक्तः स्वयमेव राज सम्मुखमाजगाम। स्वप्ने स्वामिप्रोक्तशिल्परूपं वृद्धसमीपे दृष्ट्वा राजा अङ्गीचकार। परन्तु एका वृद्धमूर्तिः आत्मना विग्रहनिर्माणसमये द्वारबन्धः मया कथनपर्यन्तं न उद्घाटनीयः इति नियमं प्रोवाच। राजा तन्नियममङ्गीचकार।

केषाञ्चिद्दिनानामनन्तरं इन्द्रद्युन्ममहाराजस्य पट्टमहिषी ''गुण्डीया'' क्षमारहिता वृद्धः विग्रहनिर्माता किं करोतीति द्रष्टव्यमिति अनुक्त्वैव द्वारमुद्घाटयामास। झटिति शिल्पी वृद्धः अदृश्यः अभूत्। एतत्कारणात् असम्पूर्णविग्रहाः एव अद्य आलये अस्माभिः दृश्यन्ते। इमं विषयं प्रभावञ्चाधिकृत्य बह्व्यः कथाः वर्तन्ते। यात्रिकाः श्रुत्वा आनन्दमनुभवन्तु।

आगमज्यौतिषग्रहगतीरनुसृत्य मूर्तीः तत्स्थाने निवेशितवन्तः। परन्तु जगन्नाथस्य नाभिपद्ममात्रं प्राचीनविग्रहा दपनीयनूतनविग्रहे निवेशितम्। सः नाभिपद्मरूपः अपनेतुं न शक्यते। किंतत्र रहस्यम्? केषाञ्चिच्चरित्रकारणाणां आलोचनप्रकारं तस्मिन्नाभिपद्मे गौतमबुद्धदन्तः वर्तते इति वदन्ति। भक्तिमार्गदृष्ट्या परिशीलनात् जगन्नाथो नाम दशावतारस्थकृष्णावतारमूलकारणभूतः जगन्नाथः भवतीति सार्थकनामधेयमेव। सर्वेषां हिन्दूनां कुलवैचक्ष्यण्येन विना दर्शनीयोऽयं विग्रहः। अन्यमतस्थाः विदेशीयाः अन्तःप्रवेष्टुं नाङ्गीक्रियते। तादृशैः समीपस्थरघुनन्दनग्रन्थालयभवनेभ्यः स्थितैः आलयं द्रष्टुं शक्यते। तदा सर्वोऽप्यालयः द्रष्टुं शक्यते।

**आलयनिर्माणविशेषः -** पञ्जुजेम्सू फेर्गूसन् महोदयैः पूरीरथयात्रामधिकृत्य केमेरायन्त्रेण गृहीतं दृश्यम् (..........)

आलयः चतुरस्रतया विद्यमानः एकैकः भुजः मा - किं २०० मीटर् पर्यन्तं विद्यते। वलयाकारप्रहरीकुड्यानि ६ मीटर्स् औन्नत्य विशिष्टानि। एवं द्वेकुड्ये प्रहर्यः वर्तन्ते। शंखाकारालयगोपुरं गगन - चुम्बितमिव ५८ मीटर्स् औन्नत्य विशिष्टं भवति। गोपुरोपरि ध्वजःसुदर्शनचक्रसहितः वर्तते। इदं ध्वजसुदर्शन चक्रं मैल्लपर्यन्तं दृश्यमानं सत् पूरीनगरमागन्तुं यात्रिकाः आह्वयतीव दृश्यते। प्रधानद्वारम् साक्षरसिंहद्वारं द्वारपार्श्वे उभयतः शिलासिंहविग्रहौ, विद्यमानौ, द्वारपालकत्वेन भाव्येते। परन्तु मध्ये स्वल्पविग्रहत्वेन विद्यमानसुभद्रामूर्तेः मात्रं हस्तौन दृश्येते। इदमसम्पर्णत्वेन त्यक्तनिर्माणस्य निदर्शनमिव भवति। एताः मूर्तयः परवडिदिनेषु यात्रादिनेषु विशेषालङ्कारैः नित्यनूतनपुष्पमालाभिः अलङ्कृताः दृश्यन्ते। आलयनिर्वहणे २००० कर्मकारिणः स्वजीवनभृतिं प्राप्नुवन्ति। आलयनिर्वाहकाः ३१ श्रेणीत्वेन ९७ कक्ष्यात्वेन विभक्ताः **रथयात्रा -** इयंरथ यात्रा लोक प्रसिद्धि। अयमुत्सवः आषढमासे प्रवर्तते। रथोत्सवदर्शनार्थ लक्षधिकापरिमितयात्रिकाः आगच्छन्ति। हिन्दूदेशे अतिविशेषत्वेन प्रवर्तमानकमनीयोत्सवेष्वयमेकः। इयं रथयात्रा श्रीकृष्ण स्वामिनः गोकुलात् मधुरागमनयात्रेव परिगण्यते। आलयस्थ बलभद्रजगन्नाथसुभद्राविग्रहानानीय रथे प्रतिष्ठाप्य रथयात्रां निर्वहन्ति। आलयपुरतः प्रारब्धा रथयात्रा एककिलोमीटर् गुडीचामन्दिरपर्यन्तं गच्छति। अस्मिन् जगन्नाथालये बहूनि मन्दिराणि सन्ति। अत्रैव पञ्चतीर्थाणि सन्ति। बडेकृष्णरोहिणी तीर्थाणि, समीपे मार्कण्डेयतीर्थञ्च वतन्ते। इदंतीर्थं १/२ किलोमीटर् पर्यन्तं वर्तते। इदं महारथिनामक स्वर्गद्वारसमुद्रतीरे वर्तते। स्वच्छजलैः इन्द्रद्युम्नतीर्थं, नरेन्द्रतीर्थमपि एतैस्सहवर्तते। अत्र स्नानाचरणं महापुण्यप्रदम्।

''ओं नमो जगन्नाथाय''



# व्यासपूर्णिमा

**29.07.2026**

आषाढपूर्णिमां व्यासपूर्णिमेति वदन्ति। इदं पर्व यतीनामतिमुख्यम्। अस्मिन्दिने महाभारतसंहिताग्रन्थकर्तारं व्यासं पूजयन्ति। व्यासपूर्णिमापर्व आदौ शङ्कराचार्येण प्रारब्धेति वदन्ति।

**पूजाविधानम् -** नूतनाङ्गवस्त्रं भूमौ विस्तीर्णतया निवेशयन्ति। तस्मिन् तण्डुलानि निवेशयन्ति। तण्डुलेषु निम्बफलानि निक्षपन्ति। शङ्करस्य शिष्याः शङ्करश्च तानि स्वीकुर्वन्तीति विश्वासः। पूजानन्तरं तत्तण्डुलानिहस्तपरिमितानि नीत्वा स्वगृहतण्डुलेषु मिश्रीकुर्वन्ति। तण्डुलानि नव वस्त्रं च लक्ष्मीचिह्नम्। शुभसन्दर्भेषु तण्डुलानि यथा शक्ति राशीकृत्य लक्ष्मीदेव्याः आह्वानं हिन्दू गृहेषु सम्प्रदायः। निम्बफलानि बहुमतित्वेन दीयन्ते। एतानि कार्यसिद्धिसूचकानि। तण्डुलानि निम्बफलानि लक्ष्मीकटाक्षसिद्ध्यर्थमेव। दक्षिणभारते कुम्भकोणे श्रृङ्गेरीप्रान्ते शङ्करपीठानि सन्ति। तत्र व्यासपूर्णिमा नितान्तवैभवेन निर्वाह्यते। तस्मिन् दिने सहस्राधिकतैर्थिकाः आगच्छन्ति। व्यासपूर्णिमा एव गुरुपूजादिनमिति पाञ्चजन्यपत्रिका प्रकटयति। अत्र व्यासपदम् गुरुपरमेव। तस्मिन्दिने लोके सर्वत्र स्वस्वगुरूनाराध्य पुण्यं सम्पादनीयमिति शास्त्रोपदेशः। स्वस्वरूपानुसन्धानात् भिन्ननव्याराधनाभिज्ञैः यतिशेखरैः एतदाचार्य पीठार्चनं कर्तव्यमिति शास्त्रोपदेशः। गुर्वाराशनं विशेषप्रयोजनकारि अनुल्लंघ्यमिति वक्तुं प्रबलप्रमाणद्वयं वर्तते। ‘‘यस्य देवे पराभक्तिः यथा देवे तथा गुरौ’’ इति श्वेताश्वतरोपनिषद्वचनम्। अत्र वेदमाता ईश्वराराधनेन सह तुल्यगौरवं समप्राधान्यं गुरुपूजायाः ददाति। स्मृतिकर्तुभिः इतोऽधिकतया प्रोक्तम्। ‘‘दैवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन’’ गुर्वनुग्रहात् दैवानुग्रहः अत्यावश्यकविशेषः। एवं दैवानुग्रहादपि गुर्वनुग्रहः महानित्यपि वदन्ति। साधनमनपेक्ष्य वा तस्मिन्नज्ञतां प्रदर्श्य वा सिद्धिप्राप्त्याशा अविवेकः हास्यास्पदः इति तेषामुद्देश्यम्।

- डा वि.माधवरेड्डि - चरवाणी - ९९४८५२३२५९

व्यासपदमाधिकारिकपदमेव न व्यक्तिरपरमिति तेषुदिनेषु गुरुपीठार्चने, अद्यदेशव्याप्तयतिकर्तुकपूजामात्राणि उपलक्षणानि मात्रमित्येव इति तेषु दिनेषु सर्वधा स्वगुर्वर्चनं कृत्वा गुरुभक्तिं प्रकटीकृत्य तद्वर्धनविधिरिति अस्माकं विश्वासः। व्यासपूर्णिमायां व्यासपदं व्यक्तिपरं न भवति। बहवः ऋषयः सन्ति किल? केवलं व्यासनाम्नैव इयं किमर्थं निर्वाह्यते अत्रहेतुः कः इति विचारणे - अत्र पूजाः शङ्करावतारव्यास भगवन्तमुद्दिष्टाः एव इति वदन्ति। व्यासपूजा नाम आदिशङ्कराचार्य पूजैव। सन्न्यासिनः सर्वे आदिशङ्करः एव स्वगुरुरिति वदन्ति। इयं व्यासरूपे गुरुपूजा भवति। शङ्कराचार्यजयन्त्यां प्रत्येकं दिनमुद्दिष्टं भवति। अतः गुरुपूजा दिनमिदम् - **महाशिवसमारम्भां शङ्कराचार्यमध्यमां।**
**अस्मदाचार्य पर्यन्तां वन्दे गुरुपरम्पराम्।।**

महाषाढ - व्यासपूजा - **शङ्करं शङ्कराचार्यं गोविन्दं बादरायणम्।**
**सूत्रभाप्यकृतौ वन्दे भगवन्तौपुनः पुनः।।**

इति पूजा ब्रह्मत्वसिद्धये एव। आषाढपूर्णिमायां वैष्णवपुराणदानात् विष्णुलोकप्राप्तिर्भवेत्। व्यासः सकलकलानिधिः सकलशास्त्रवेत्ता। सोमकराक्षसेन वेदेषु अपहृतेषु ते परस्पमिश्रितेषु विष्णुरेव व्यासवातारं स्वीकृत्य वेदविभजनञ्चकार। न केवलं वेदविभागविद्यावेत्ता, शस्त्रचिकित्सानिपुणोप्ययम्। गान्धार्या ईर्ष्यया छिन्नगर्भस्थपिण्डं रक्षित्वा तस्मिन्पिण्डे १०१ शिशवः सन्तीति ज्ञात्वा घृतकुण्डे निक्षिप्य पोषकः वैद्यवरः वैद्यविद्यानिधिरयम्। आत्मविद्यानिधिं भगवन्तं व्यासं पूजयितुमुद्दिष्टं दिनमिदम्।

**व्यासं वसिष्टनप्तारं शक्तेः पौत्रमकल्पषं।**
**पराशरात्मजं वन्दे शुकतातं तपो निधिम्।।**

अयं वेदान् ऋग्यजुस्सामाधर्वात्मना चतुर्धा विभज्य स्वशिष्यान् प्रचाराय नियुयोज। अयं लक्षश्लोकात्मक महाभारतं, अष्टादशपुराणानि, उपपुराणानि, महाभागवतं ब्रह्मसूत्राणि विरचय्य जगद्गुरुः सञ्जातः। महाभारतमधिकृत्य ‘‘यदिहास्ति नतदन्यत्र यन्नेहास्ति नतत्क्वचिदिति’’। प्रसिद्धिर्वर्तते। महाभारतं पञ्चमोवेदः इति वदन्ति।

**व्यासाय विष्णुरूपाय व्यासस्पाय विष्णवे।**
**नमो वै ब्रह्मनिधयेवासिष्ठाय नमो नमः।।**



गुरुदेवब्राह्मणेषु भक्तिमूलम्। सर्वस्य भूषणं विनयः।



नीतिकथा

# अन्त्यकाले नारायणनामोच्चारणं सर्वपापप्रक्षालकं मोक्षलक्ष्मीप्रापकञ्च

- डा. पि.माधवी
चरवाणी - ८५१९८०४७८४

कन्याकुब्जे अजामिलो नाम ब्राह्मणः आसीत्। सः सच्छीलः सदाचारी इन्द्रियमनोविग्रहपरः पितृभक्तिपरकश्च आसीत्। कदाचित् फलपुष्पाणि समित्कुशनामक द्विविधतृणायननाय पित्राज्ञया अटवीं गतः। गृहं प्रतिनिर्गमनसमये वेश्यालिङ्गनं कृतवन्तं शूद्रमपश्यत्। सः शुद्रः कामोन्मत्तः तया चुम्बनादिकलापान् करोति स्म। स्रस्तवस्त्रां तां दृष्ट्वा कामवांछया चलितमनस्कः अजामिलः किञ्चित्कालानन्तरं तां वेश्यां स्वगृहमानिनाय। वेश्यानुरागबद्धः पितृदत्तसंपदमपि वैश्यायै ददौ। वेश्यासाङ्गत्येन स्वभार्यामपि तत्याज। ब्राह्मणकर्माणि सर्वाणि परित्यज्य शूद्रकर्मरतः भार्यापुत्रपोषणाय चौर्याद्य धर्मकार्याण्यपि करोति स्म। वेश्यासङ्गमात् दशपुत्राणां पिता बभूव। सः दशमपुत्रस्य नारायणः इति नामकरणं चकार। दशमपुत्रे अमितानुरागः सदा तमेव स्मरन् नारायणनाम निमग्नः आसीत्। नारायणनामकपुत्रेण विनाक्षणमपि कालं न यापयति स्म। अजामिलः वृद्धः जातः। तस्य अन्त्यकालः प्राप्तः। यमभटाः पाशहस्ताः भयङ्कराकाराः तत्समीपमागताः। ते यम भटाः त्रयः मनसा वाचा कर्मणा पापाचरणात् तं यमलोकंनेतुमागताः। तान् दृष्ट्वा भयोद्विग्नमानसः स्वपुत्रं नारायणं नारायण! नारायण! नारायण! नारायण! इति चतुर्वारमाह्वयामास। झटिति चत्वारः विष्णुदूताः तं रक्षितुं प्रत्यक्षीभूताः आसन्। यमभटाः तदा अजामिलहृदयकुहरात् जीवात्मानं आकृष्य नयनाय प्रयत्नमकुर्वन्। ते विष्णुदूतदर्शनात् धैर्यहीनाः यमराज शासनंधिक्कर्तुं के यूयम्? किमर्थं अस्मत्कार्यं निरुन्धत इत्यपृच्छन्। तदा विष्णुदूताः हसन्तः ''यमभटानुद्दिश्य'' यूयं धर्माधर्मस्वरूपं , दण्डनार्हाः दण्डनानर्हाः इति जानीथ वा इत्यपृच्छन्। तदा ते वेदनिर्दिष्टः धर्मः, तद्विपरीतः अधर्मः इति नारायणः एव समस्तजगत्कारणः इति अजामिलः स्वपापप्रायश्चितं न कृतवान्। अतस्तं दण्डणार्थं यमपुरीं नयामः इति समादधुः। तदा विष्णुदूताः यम दूतानुद्दिश्य एवमूचुः - निस्सहायस्थितौ नारायणनामोच्चारणात् कोटिजन्मपापानामपि प्रायश्चित्तं भवति। अभावेनापि अपराधरहिततया अनेन नारायण नामोच्चारणं कृतम्। 'वत्स! नारायण वत्स नारायण अत्र आगच्छेति बहुवारं नारायणपदमुच्चचार। विष्णुनामोच्चारणं सर्वपापहरम्। भगवन्नाम परोक्षेण वा परिहासेन वा श्रद्धारहिततया उच्चरितं सत् पापराशिं नाशयति। एव मुक्त्वा विष्णुदूताः भगवतधर्मं निरूप्य अजामिलं यमदूतेभ्यः ररक्षुः। एवं विष्णुदूतागमनात् अजामिलः यमपाशविमुक्तः विष्णुदूत पादपद्मयोः नमश्चकार। ततः तेन विष्णुदूतेब्यः कृतज्ञताविष्करणसमये विष्णुदूताः अन्तर्हिताः आसन्।

पापिष्ठाः, दुराचाराः दैवविरोधिनः अकालमृत्युं प्राप्स्यन्ति। वैष्णवाः विष्णुदूततुल्याः, विष्णुदूताः अजामिलमिव बद्धजीवान् बहुक्लेशेभ्यः रक्षन्ति। हरिनामदीक्षाप्रदानद्वारा, कृष्णसेवास्थितत्वेन आचरणद्वारा कृष्णकथासुधाश्रावणद्वारा कृष्णप्रसादेन देहात्मबुद्धिनिवारण द्वारा बद्धजीवानां वैष्णवैः उद्धारणपद्धतिः अत्यद्भुता। विष्णुदूतैः रक्षितः अजामिलः हृदयपरिवर्तनं प्राप्य भार्यापुत्रान् पितरश्च परित्यक्तोऽस्मीति पश्चात्तप्तः भक्तिपरतत्त्वभावनासुस्थितः हरिद्वारं जगाम। तत्र कृष्ण सेवातत्परः भगवद्ध्याननिमग्नः बभूव। तदा पूर्वदृष्टाः विष्णुदूताः प्रत्यक्षीभूताः तस्य भगवत्प्राप्तिं प्रापयितुं दिव्यविमाने आगताः। अजामिलः भक्त्या तान् नमश्चकार। तत सः भौतिकदेहं परित्यज्य भगवत्पार्षपदत्वाय योग्यं आध्यात्मिकदेहमवाप। एवं दिव्यदेहधारी सः स्वर्णमयविमानमधिरुह्य आकाशमार्गे गत्वा लक्ष्मीपतेः विष्णोः सान्निध्यमवाप। भगवन्नामोच्चरणफलमेव पापहरं अजामिलस्य मोक्षदायकं बभूव।


वसुदेवसुतं वन्दे कंसचाणूरमर्दनं।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्।।

ऋणशत्रुव्याधयः निश्शोषाः कर्तव्याः।

चित्रकथा

# गुरुदक्षिणा

तेलुगुमूलम् - डि.श्रीनिवासदिक्षितुलु
चित्राणि - श्री के.तुलसीप्रसादः
संस्कृतानुवादः - डा के.सूर्यनारायणरेड्डि
चरवाणी - ८७०६५७८२५०






अनृतमपि दुर्वचनं थिरंतिष्ठति। प्रियवादिनः न रात्रुः।



तदा रघुः अङ्गीचकार। युद्धप्रयत्नात् विरतः। झटिति कुबेरः महाराजस्य कोशगारं स्वर्णनाणेकैः पूरयामास। महाराजा कौत्समाह्वयामास।
अर्य! मत्कोशागारस्थसर्वस्वं धनं स्वीकृत्य गच्छ!।
राजवचनानि श्रुत्वा कौत्सः आनन्दपूर्णमनस्कः.......
महाराजन्! मया गुरोः देयं धनं चतुर्दशकोटिपरिमित सुवर्णनाणेकाः एव। तावदेव धनं स्वीकरिष्यामि स एव धर्मः न्याय्यश्च।
रघुः कोत्सेन...
आर्य! शिष्टं धनमपि स्वीकृत्य गच्छ, तदापि तवैव।
रघुः कोत्समुद्दिश्य ....
आर्य सर्वं धनं स्वीकृत्य गच्छ तदपि धनं तवैव।
रघुः कौत्समभिननन्द!
आर्य! तव धर्मदृष्टिः न्यायदृष्टिः गुरुभक्तिः प्रशंसार्हाः।
कोत्सः सानन्दं गुरुदक्षिणां समर्पयामास।
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुदेवोमहेश्वरः।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः।।
सर्वे जनास्सुखिनो भवन्तु।

# जूलै 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९४९०७४१४१४





**१.मेषराशिः -** भूलाभः, सोदरलाभः, वाहनयोगः, आध्यात्मिकजीवनेच्छा, उत्साहः, धैर्यं, उद्योगव्यापारेषु सानुकुल, अधिकारजनप्रशंसाः सम्भवन्त्यपि तदा तदा मनोदुःखं शरीरकष्टं च भविष्यन्ति। श्रीविष्णुसहस्रनामस्तोत्रपारायणं कर्तव्यम्।



**२.वृषभराशिः -** उत्साहः, धैर्यं, कुटुम्बाभिवृद्धिः, तीर्थयात्रालाभः, दैवदर्शनं, शान्तस्वभावः, वाहनयोगः, भाग्यलाभः भविष्यन्ति। शिवाराधनं करणीयम्।



**३. मिथुनराशिः -** आरोग्यं, उत्साहः, धैर्यं, अनूह्यधनलाभः, वाक्सौमनस्यं, कोपस्वभावः, उद्योगपरिवर्तनं, अधिकारजनप्रशंसाः सम्भवन्त्यपि सोदरनष्टं ज्वरबाधा तदा तदा सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।



**४.कर्काटकराशि : -** सर्वत्रलाभः, अधिकशुभफलानि, व्यापारद्वारा धनव्ययः, सोदरलाभः, भूलाभः, अधिकप्रयाणानि, दूरगमनेच्छा, आध्यात्मिकचिन्तनं दैवदर्शनं, मन्त्रजपः, तदा तदा अपयशः, आत्मन्यूनता सम्भविष्यन्ति। राहुग्रहपूजनं कर्तव्यम्।



**५. सिंहराशिः -** भू-गृह-वाहन-वस्तु संपादनद्वरा अधिकधनव्ययः, स्थानभ्रंशः, उद्योगपरिवर्तनं, अधिकारजनद्वाराबाधा सम्भवन्त्यपि यशः, आध्यात्मिकचिन्ता, धनागमनं, बन्दुमित्रसमागमः भविष्यन्ति। गुरुग्रहपूजनं करणीयम्।



**६. कन्याराशिः -** भाग्यलाभः, उद्योगपरिवर्तनं, प्रयाणलाभः, अधिकसुखं, दैवदर्शनं, वाहनलाभः, नूतनवस्त्रधारणं, शत्रुजयः, नूतनद्रव्यलाभः, मित्रलाभः सम्भवन्त्यपि मनसः दुःखं तदा तदा सम्भविष्यन्ति। शनिग्रहाराधनं कर्तव्यम्।



**७. तुलाराशिः -** शुभलाभः, सर्वत्र अनुकूल समयः, भाग्यलाभः, भूलाभः, उद्योलाभः, आध्यात्मिककार्येषु निमग्नता, उत्साहः बन्धुमित्रसमागमः, प्रयाणलाभः, आत्मोन्नतिः, राजसम्माननं च तदा तदा ज्वरपीडा सम्भविष्यन्ति। सुब्रह्मण्याराधनं कर्तव्यम्



**८. वृश्चिकराशिः -** भाग्यलाभः, आध्यात्मिकचिन्तनं, दैवदर्शनं, विद्याव्यासङ्गेषु अनुकूलता, तीर्थयात्रालाभः, अधिकारजनप्रशंसाः, वस्त्रलाभः, बन्धुसमागमः सम्भविष्यन्ति तदा तदा मनोव्यथा धननष्टं शरीरकष्टं च सम्भविष्यन्ति। श्रीमहाविष्णोः आराधनं करणीयम्।



**९. धनूराशिः -** शुभकार्येषु, अधिकधनव्ययः आध्यात्मिकचिन्तनं, भूलाभः, सोदरलाभः, वैराग्यजीवनं, तीर्थयात्राभिलाषः, दैवदर्शनं, उद्योगव्यापारेषु, परिवर्तनं, कलत्रसौख्यम्, धनलाभः, अधिकारजनबाधा मनोभीतिः भविष्यन्ति। श्रीमहाविष्णोः आराधनं कर्तव्यम्।



**१०. मकरराशिः -** आध्यात्मिकजीवनं, सर्वत्रलाभः, अधिकारजनप्रशंसाः, वैराग्यभावना, वाक्पारुष्यं, शत्रुजयः, अपरिष्कृतकार्याणां परिष्कारः, भूलाभः, विद्याव्यासङ्गेषु आनुकूल्यता, उत्साहः भविष्यन्ति। शिवाराधनं कर्तव्यम्।



**११. कुम्भराशिः -** वाक्पारुष्यं, धनागमनचिन्ता, शरीरकष्टं, विद्याव्यासङ्गेषु विघ्नाः सम्भवन्त्यपि उद्योगव्यापारेषु सानुकूलता, पुत्रलाभः, आध्यात्मिक जीवनेच्छा, भू-गृह-वस्तु वाहनादीनां संपादनेच्छा भविष्यन्ति शनिग्रहाराधनं कर्तव्यम्।



**१२. मीनराशिः -** उत्साहः, धैर्यं, मृष्टान्नभोजनं, बन्धुसमागमः, आध्यात्मिकजीवनेच्छा, विद्या उद्योगव्यासङ्गेषु अनुकुलता, अधिकारजनप्रशंसाः सम्भविष्यन्ति। तदा तदा भ्रातृचिन्ता, दुःखानि, मनोव्यथा, अधिकधनव्यय, शरीरश्रमः सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।



परायत्तेषु उत्कण्ठा न कुर्यात्।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517 507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.



# ताल्लपाक
# श्री चेन्नकेशवस्वामिनः ब्रह्मोत्सवः

**24-07-2026 आरभ्य 02.08.2026 पर्यन्तम्**

| दिनाङ्कः | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 24-07-2026 | भृगुवासरः | दीक्षातिरुमञ्जनम् | अङ्कुरार्पणम् |
| 25-07-2026 | मन्दवासरः | ध्वजारोहणम् | शेषवाहनम् |
| 26-07-2026 | भानुवासरः | आन्दोलिकासेवा | हंसवाहनम् |
| 27-07-2026 | इन्दुवासरः | आन्दोलिकासेवा | सिंहवाहनम् |
| 28-07-2026 | भौम्यवासरः | आन्दोलिकासेवा | हनुमद्वाहनम् |
| 29-07-2026 | सौम्यवासरः | मोहिन्यवतारोत्सवः | गरुडवाहनम् |
| 30-07-2026 | बृहस्पतिवासरः | --- | सायं - आर्जित कल्याणोत्सवः<br>गजवाहनम् |
| 31-07-2026 | भृगुवासरः | --- | रथोत्सवः |
| 01-08-2026 | मन्दवासरः | --- | अश्ववाहनम् |
| 02-08-2026 | भानुवासरः | चक्रस्नानम् | ध्वजावरोहणम् |

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-06-2026 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.

